# अध्यायः - 10

## समानतायै सङ्घर्षः

*अस्मिन् पुस्तके भवन्तः अधुना पर्यन्तं कान्तायाः अंसारीदम्पत्योः मेलान्याः स्वप्नायाः च विषये पठितवन्तः। अधुना एतेषां सर्वेषां कथासु यत् तथ्यं समानम् अस्ति तद् अस्ति यत् तैः सह असमानतायाः व्यवहारः कृतः इति । एतादृशीषु स्थितिषु जनाः किं कर्तुं शक्नुवन्ति? इतिहासे एतस्य विषयस्य अनेकानि उदाहरणानि सन्ति यत्र जनाः असमानतानां विरोधे न्यायस्य च कृते सङ्घर्षं कर्तुं एकत्रीभूताः जाताः। किं प्रथमे अध्याये वर्णिता रोजापार्क्स-महोदयायाः कथां भवन्तः स्मरन्ति? किं पञ्चमाध्याये स्त्री-आन्दोलनेषु पठितान् लेखान् चित्रलेखान् च भवन्तः स्मरन्ति? अस्मिन् अध्याये भवन्तः केषाञ्चित् एतादृशानां प्रयासानां विषये पठिष्यन्ति येषां माध्यमेन जनाः असमानतायाः विरोधे सङ्घर्षं कृतवन्तः।*



भारतस्य संविधानं प्रत्येकं भारतीयनागरिकं समानदृष्ट्या पश्यति । भवन्तः पुस्तकस्य प्रथमे भागे पठितवन्तः एव सन्ति यत् राज्यस्य तथा च तस्य अधिनियमस्य दृष्टौ केनापि जनेन सह तस्य जातेः लिङ्गस्य धर्मस्य तथा च तस्य निर्धनस्य धनाढ्यस्य च आधारेण कश्चित् भेदभावः न कर्तुं शक्यते। देशस्य प्रत्येकं वयस्कस्य नागरिकस्य पार्श्वे निर्वाचनकाले समानरूपेण मतदानस्य अधिकारः अस्ति। मताधिकारस्य बलेन एव जनता स्वप्रतिनिधीः चिनोति तथा च परिवर्तयति ।

*मताधिकारस्य बलम् इत्यतः भवान् किम् अवगच्छति ? विषयेऽस्मि परस्परं चर्चां कुर्वन्तु ।*

मताधिकारेण अस्माकम् अन्तः समानतायाः भावः विकसति यतोहि अस्माकं मतस्य अपि मूल्यं तावद् एव अस्ति यावत् कस्यापि जनस्य मतस्य वर्तते । परन्तु अयं भावः अधिकतराणां जनानां जीवनं न स्पृशति । भवद्भिः पूर्वतनेषु अध्यायेषु पठितं यत् कथं स्वास्थ्यसेवासु निजीकरणं वर्धते तथा च सर्वकारीयाणां चिकित्सालयानां या शिथिलता दायित्वहीनता च अस्ति तया कान्ता-हाकिमशेख-अमन-सदृशानाम् अत्यन्तं निर्धनानां जनानां कृते स्वास्थ्यसेवाः अत्यन्तं काठिन्येन लभ्यमानाः सन्ति इति कृतम् अस्ति । एते ते जनाः सन्ति ये बहुमूल्य-निज-स्वास्थ्य-सेवायाः व्ययं न सोढुं शक्नुवन्ति ।

अनेन एव प्रकारेण पश्यन्तु काचित् वृद्धा महिला या गृहे शोभनम् उपसेचनम् अवलेहं वा निर्माति महाव्यापारि-समूहानां यानि दीर्घाणि विज्ञापनानि वस्तूनि विक्रेतुं सन्ति तथा च तेषां पार्श्वे यानि अनेकानि संसाधनानि सन्ति तेषां पुरतः दुर्बलतरा जायते तथा च स्पर्धितुं न अर्हति । स्वप्नायाः पार्श्वे अपि पर्याप्त-संसाधनानां न्यूनता अस्ति अपि च अतः स्वकार्पासस्य सस्यं प्ररोहितुं धनाढ्यतः ऋणं स्वीकरणीयं भवति। एतद् एव कारणम् अस्ति यत् तया स्वीयम् उत्तमं सस्यं न्यूनमूल्ये विक्रेतव्यं भवति । सम्पूर्णे देशे मिलान्याः सदृशाः अनेका गृह्यकर्मकर्यः लक्षाधिकाः महिलाः सन्ति याः नैरन्तर्येण परिश्रमपूर्वकम् अन्येषां गृहेषु कार्यं कुर्वन्ति । तदनन्तरम् अपि ताः अपमानिताः भवितुं बाध्याः सन्ति यतोहि ताः संसाधनानाम् अभावात् स्वस्य किमपि कार्यं न कर्तुं पारयन्ति । निर्धनता तथा च संसाधनानाम् अभावः अद्यापि भारतीये समाजे विषमतायाः असमानतायाः च बृहत्तमेषु कारणेषु एकं कारणम् अस्ति ।

अपरस्मिन् पक्षे अंसारी-दम्पतिना संसाधनानाम् अभावात् अथवा न्यूनतायाः कारणात् असमानता न सोढव्या अभवत् । वास्तविकतायां यद्यपि तेषां पार्श्वे भाटकं दातुं पर्याप्तं धनम् आसीत् पुनरपि ते एकं भाटकगृहं प्राप्तुं आमासम् अटितवन्तः । जनाः तेषां धर्मस्य कारणतः तेभ्यः गृहं दातुं निषेधं कृतवन्तः।

भारते इयं काचित् वास्तविकता अस्ति यत् ये निर्धनाः सन्ति सामान्यतः दलिताः आदिवासिनः तथा च मुस्लिम-समुदायस्य ये जनाः सन्ति अपि च तेषु अपि विशेषतः महिलाः सन्ति।

2001 इति वर्षस्य जनगणनायाः अङ्काः ज्ञापयन्ति यत् अस्माकं जनसङ्ख्यायां 48 प्रतिशतं महिलाः सन्ति,13 प्रतिशतं मुस्लिमजनाः सन्ति 16 प्रतिशतं दलिताः सन्ति तथा च 8 प्रतिशतम् आदिवासिनः सन्ति।

*किं भवन्तः स्वस्य परिवारे समुदाये ग्रामे अथवा नगरे कस्यचित् एतादृशस्य जनस्य विषये चिन्तयितुं शक्नुवन्ति यस्य भवन्तः एतदर्थं सम्मानं कुर्वन्ति यतोहि सः न्यायार्थं समानतायै च सङ्घर्षं कृतवान् ?*

अनेन एव प्रकारेण विद्यालयस्य अध्यापकाः ओमप्रकाश-वाल्मीकिना एतस्मात् कारणात् विद्यालयस्य क्रीडाक्षेत्रस्य स्वच्छतां कारितवन्तः यतोहि सः दलितः आसीत्। भवद्भिः अस्मिन् एव पुस्तके पठितम् अस्ति यत्
महिलाभिः करणीयानि कार्याणि प्रायः पुरुषाणां कार्याणां तुलनायाम् अकार्याणि एव गण्यन्ते। एतैः सर्वैः सह क्रियमाणस्य भेदभावस्य प्राथमिकं कारणम् एतद् आसीत् यत् ते कस्यचित् सामाजिक-सांस्कृतिक-पृष्ठभूमितः आसन् अथवा ताः महिलाः आसन्। धर्म-जाति-लिङ्गादयः कानिचन महत्त्वपूर्णानि कारकानि सन्ति येषाम् आधारेण अद्यापि भारते जनैः सह असमानतायाः व्यवहारः क्रियते।
निर्धनता मानवीयगरिम्णः अभावः अपि च काञ्चन विशिष्टान् समुदायान् प्रति अपमानसदृशानि कारकाणि प्रायः एतादृशेन मिश्रितरूपेण पुरतः आयान्ति यत् एतस्य तथ्यस्य निर्धारणं कठिनं भवति यत् कुत्र एकप्रकारका असमानता समाप्ता भवति तथा च कुत्र अपरा असमानता प्रारभते । भवद्भिः पठितम् अस्ति यत् दलितासु मुस्लिमबालिकासु अध्ययनस्य मध्ये एव त्यक्तॄणां सङ्ख्या अत्यधिका अस्ति । एषा स्थितिः निर्धनतायाः सामाजिक्यः असमानतायाः च कारणात् तथा च एतेषां समुदायानां कृते सम्यक्-विद्यालयीयानां सुविधानां च अभावसदृशानां कारणैः उत्पन्ना अस्ति ।

## *समानतायाः कृते सङ्घर्षः*

सम्पूर्णे विश्वे समग्रेषु समुदायेषु ग्रामेषु नगरेषु भवन्तः द्रष्टवन्तः स्युः यत् केचन जनाः समानतायै कृतसङ्घर्षाणां कारणात् सम्मानरूपेण परिचीयन्ते। एते ते जनाः सन्ति ये आत्मना सह अथवा स्वस्य पुरतः कृतस्य भेदभावस्य विरोधे आन्दोलनं कृतवन्तः। वयम् एतेषां सम्मानम् एतस्मात् कारणाद् अपि कुर्मः यतोहि एते प्रत्येकं जनं तस्य मानवीय-गरिम्णा सह स्वीकृतवन्तः तथा च सदैव एतं धर्मस्य समुदायस्य च आधारेण न दृष्टवन्तः। एतादृशान् जनान् जनाः महता विश्वासेन स्वसमस्यानां समाधानार्थम् आह्वयन्ति।

प्रायः समानतायाः कमपि विशिष्टं विषयम् अधिकृत्य सङ्घर्षशीलाः जनाः समाजे काञ्चित् विशिष्टां प्रसिद्धिं प्राप्नुवन्ति यतोहि समतायाः सङ्घर्षे बहवः जनाः तेषां समर्थनं कुर्वन्ति । भारते एतादृशानाम् अनेकेषां सङ्घर्षाणां स्मरणं कर्तुं शक्यते यत्र जनाः एतादृशीनां समस्यानां समाधानार्थं सङ्घर्षमार्गं चितवन्तः यान् विषयान् ते महत्त्वपूर्णाः इति चिन्तितवन्तः। पञ्चमाध्याये भवन्तः पठितवन्तः यत्कथं कैः च उपायैः समानतायाः कृते महिलानाम् आन्दोलनं स्वरूपं प्राप्तवान् । मध्यप्रदेशस्य तवा-मत्स्यसङ्घः एतादृशम् एव अपरम् उदाहरणम् अस्ति यत्र जनाः स्वस्य अधिकारार्थम् आन्दोलनं कृतवन्तः। एतादृश्यः समस्ताः सङ्घर्षगाथाः अस्माकं पार्श्वे सन्ति यासु धूमदण्डिकायाः श्रमिकाः धीवराः कृषकाः पर्णकुटीर-निवासि-समूहाः च नैकप्रकारेण न्यायार्थं सङ्घर्षं कृतवन्तः । एतादृशाः समस्ताः प्रयासाः अपि अस्माकं पुरतः सन्ति यत्र जनैः सङ्घीभूय संसाधनानाम् उपरि नियन्त्रणं कर्तुं सहकारि-सङ्घटनानि रचितानि ।

***तवा-मत्स्यसङ्घः***

यदा वनस्य महान्ति क्षेत्राणि पशूनां कृते अभ्यारण्यरूपेण घोषितानि भवन्ति तथा च विशालानां जलबन्धानां निर्माणं क्रियते तदा सहस्रं जनाः विस्थापिताः भवन्ति । समस्तग्राम-वासिभिः स्वग्रामाः गृहाणि च परित्यज्य कुत्रचित् अन्यत्र नूतनानि गृहाणि निर्मापितव्यानि भवन्ति तथा च नूतनप्रकारेण स्वजीवनस्य आरम्भः करणीयः भवति ते तथा कर्तुं बाध्याः क्रियन्ते । एतेषु विस्थापितेषु अधिकतराः जनाः निर्धनाः भवन्ति । नगरीयक्षेत्रेषु अपि ते निवासाः यत्र निर्धनाः निवसन्ति ते ततः अपसार्यन्ते । एतेषु केचन नगरस्य बाह्यक्षेत्रेषु पुनः स्थाप्यन्ते। एतस्यां सम्पूर्णायां प्रक्रियायां न केवलं विस्थापितानां जनानाम् आजीविकायाः साधनानि प्रभावितानि भवन्ति अपरञ्च नगरेषु स्थितेभ्यः विद्यालयेभ्यः दूरतायाः कारणात् एतेषां निर्धनानां बालकानाम् अध्ययनम् अपि प्रायेण गभीररूपेण प्रभावितं भवति।

***तवा-नद्याः जलाशयः***



जनानां समुदायानां च विस्थापनम् अस्माकं देशे एकस्याः महत्याः समस्यायाः रूपं धृतवान् अस्ति । एतास्याम् अवस्थायां कदाचित् जनाः सङ्घीभूय एतद्विरुद्ध्य सङ्घर्षार्थं पुरतः आयान्ति । देशे एतादृशानि बहूनि सङ्घटनानि सन्ति यानि विस्थापितानां हितार्थं सङ्घर्षं कुर्वन्ति ।

***एतस्मिन् अध्याये वयं तवा-मत्स्यसङ्घस्य विषये पठिष्यामः यः धीवराणां सहकारिसमितीनां कश्चन सङ्घः अस्ति तथा च सतपुडायाः वनेभ्यः विस्थापितजनानाम् अधिकारार्थं युद्ध्यते।***

छिन्दवाडा-जनपदस्य महादेव-पर्वत-उपत्यकाभ्यः प्रवहन्ती तवानदी होशङ्गावादे नर्मदया सह मेलितुं बैतूल इति स्थानतः भूत्वा आयाति । तवा-नद्याः उपरि कस्यचित् जलबन्धस्य निर्माणं 1958 तमे वर्षे आरब्धं तथा च 1978 तमे वर्षे पूर्तिं गतम्। वनस्य महता भागेन सह एव अत्यधिकमात्रया कृषिभूमिः अपि जलबन्धे निमग्ना जाता यतः वनवासिनः स्वस्य सर्वस्वं नष्टीकृतवन्तः। एतेषु केचन विस्थापिताः बन्धस्य पार्श्वस्थेषु क्षेत्रेषु स्थित्वा न्यूनमात्रया कृषिकार्यं तथा च मत्स्यग्रहणस्य व्यवसायः आरब्धः। एतत्सर्वं कृत्वा अपि ते अत्यल्पमेव अर्जयितुं पारयन्ति स्म ।



***नद्याः उपरि जलबन्धः एतादृशे स्थाने निर्मीयते यत्र अधिकमात्रया जलस्य एकत्रीकरणं भवितुं शक्नुयात्। अनेन प्रकारेण एकः जलाशयः जायते तथा च यथा यथा तस्मिन् जलं पूर्णं भवति भूमेः किञ्चित् महत्क्षेत्रं जले निमग्नं भवति। इत्थम् एतस्मात् कारणात् भवति यतोहि नद्याः उपरि निर्मितस्य बन्धस्य भित्तिः उच्चतरा भवति तथा च तस्याः सङ्गृहीतं जलं दीर्घाणि क्षेत्राणि यावत् प्रथितं भवति। एतत् चित्रम् उत्तराखण्डस्थस्य टिहरीबन्धे निर्मिते सति जलनिमग्नस्य क्षेत्रस्य अस्ति। एतस्य जलबन्धस्य कारणतः पुरातनं टिहरीनगरं तथा च शतं ग्रामाः, येषु केचन पूर्णतः केचन च आंशिकरूपेण जले निमग्नाः जाताः। प्रायः लक्षं जनाः विस्थापिताः जाताः ।***

*तवा-मत्स्यसङ्घस्य विषयः कः आसीत्?*

*ग्रामवासिनः एतस्य सङ्घस्य निर्माणस्य आवश्यकतां कथम् अनुभूतवन्तः?*

*किं भवन्तः चिन्तयन्ति यत् तवा-मत्स्यसङ्घस्य साफल्यस्य कारणम् आसीत् ग्रामीणानां व्यापक-सङ्ख्यायां सहभागिता? एतस्मिन् सन्दर्भे पङ्क्तिद्वयं लिखन्तु?*

1994 तमे वर्षे सर्वकारः तवा-बन्धस्य क्षेत्रे मत्स्य-ग्रहणस्य कार्यं निज-संवित्कर्मिणः अर्पितवान् । एतैः संविदा-कर्मिभिः स्थानीयाः जनाः कार्यतः पृथक्कृताः तथा च बाह्यक्षेत्रतः अल्पधनग्रहीतारः श्रमिकाः आनीताः । एते संविदा-कर्मिणः स्वस्य मल्लान् आहूय ग्रामवासिनः भायितवन्तः तथा च तेभ्यः ग्रामवासिभ्यः आह्वानानि अपि दत्तानि यतोहि जनाः ततः अपगन्तुं सज्जाः न आसन्। ग्राम्यजनाः सङ्घीभूय निश्चितवन्तः यत् स्वाधिकाराणां रक्षार्थं ते सङ्घर्षं करिष्यन्ति तथा च इतः विचलिताः न भविष्यन्ति। अनेन प्रकारेण तवा-मत्स्यसङ्घस्य रचना जाता ।




नवसङ्घटितेन तवा-मत्स्यसङ्घेन (टी.एम.एस.) सर्वकारतः याचना कृता यत् जनानां जीवन-निर्वाहार्थं बन्धे मत्स्यग्रहणस्य यत् कार्यम् अस्ति तत् कार्यं कर्तुं तेषां कृते अनुमतिः भवेत् । एताम् अभियाचनां कुर्वन्तः ते जनाः राजमार्गे

अवरोधं जनितवन्तः । तेषां विरोधं प्रतिरोधं च दृष्ट्वा सर्वकारेण सम्पूर्णायाः समस्यायाः समीक्षार्थं काचित् समितिः रचिता । समितिः ग्रामवासिनां जीवननिर्वाहार्थं तेषां कृते मत्स्यग्रहणस्य अधिकारस्य अनुशंसां कृतवती । 1996 तमे वर्षे मध्यप्रदेशसर्वकारः निर्धारितवान् यत् तवा-जलबन्धस्य जलाशयेभ्यः मत्स्यग्रहणस्य अधिकारः अत्रत्यानां विस्थापितानां कृते एव दास्यते । द्वयोः मासयोः अनन्तरं सर्वकारः तवामत्स्यसङ्घार्थं जलबन्धे मत्स्यग्रहणार्थं पञ्चवर्षाणाम् अनुबन्धं दास्यति इति स्वीकृतवान्। अनेन प्रकारेण जनवरीमासस्य द्वितीये दिनाङ्के 1997 तमे वर्षे तवाक्षेत्रस्य 33 ग्रामाणां जनानां कृते नूतनवर्षं सम्यग्-अर्थेषु प्रारब्धम् ।

तवा-मत्स्यसङ्घेन सह सम्बद्धतां कृत्वा धीवराः नैरन्तर्येण स्वस्य धनस्य आये वृद्धिं कृतवन्तः । एतद् एतस्माद् कारणाद् अभूत् यतोहि ते एकां सहकारिसमितिं रचितवन्तः या गृहीतमत्स्यानां प्रत्येकं राशेः उचितमूल्यं साक्षात् तेभ्यः यच्छति । एषा सहकारिसमितिः अनन्तर-प्रक्रियायाम् अपि सम्मिलिता भवति । सम्पूर्णा सामग्री विपणिं प्राप्नुयात् तथा च तत्रापि उचितं मूल्यं प्राप्नुयात् एतत् समितेः एव कार्यम् अस्ति । एते धीवराः अधुना पूर्वापेक्षया त्रिगुणितम् अर्जयन्ति । तवा-मत्स्यसङ्घेन जालं क्रेतुं तथा च तस्य सुरक्षार्थं धीवराणां कृते ऋणदानस्य अपि व्यवस्था कृता अस्ति । मत्स्यानां कृते सम्यक् आयस्य प्राप्त्या सह तवा-मत्स्यसङ्घेन एतस्य विषयस्य अपि व्यवस्था कृता अस्ति यत् जलाशये मत्स्याः



अत्र चित्रे टी.एम.एस. इति समितेः सदस्याः कस्मिंश्चित् प्रदर्शने विरोधं कुर्वन्तः सन्ति

***अस्मिन् चित्रे सहकारि-समितेः काचित् सदस्या मत्स्यानां तोलनं कुर्वती अस्ति।***

*किं भवन्तः स्वजीवने किञ्चित् एतादृशम् उदाहरणं स्मर्तुं शक्नुवन्ति यस्मिन् केनचित् जनेन अथवा कैश्चित् जनैः मिलित्वा असमानतायाः काचित् स्थितिः परिवर्तिता स्यात्?*

सम्यक्प्रकारेण वर्धेरन् । टी.एम.एस इति संस्था सर्वेषां पुरतः इदं तथ्यम् उपस्थापितवती यत् जनाः यदा आजीविकायाः अधिकारं प्राप्नुवन्ति तदा ते उचित-प्रबन्धनस्य गुणैः अपि समन्विताः भवन्ति ।

अत्र प्रस्तुतम् इदं गीतं विनयमहाजनेन सूचनायाः अधिकारस्य अभियाने लिखितम् अस्ति ।

**मम ज्ञातुम् अधिकारः**

***अरे! मम स्वप्नाः ज्ञातुम् अधिकृताः सन्ति...***

***किमर्थम् एते दशकेभ्यः त्रुटन्ति एते किमर्थं चरितार्थाः न भवन्ति***

***अरे!मम हस्तौ ज्ञातुम् अधिकृतौ स्तः...***

***किमर्थम् एतौ वर्षेभ्यः रिक्तौ स्तः, एतौ अद्यापि कार्यविरहितौ स्तः***

***मम पादौ एतद् ज्ञातुम् अधिकृतौ स्तः***

***किमर्थं ग्रामे ग्रामे पदातिः गमनीयं भवति, किमर्थं बसयानं नास्ति।***

***भो! मम बुभुक्षा एतद् ज्ञातुम् अधिकृता वर्तते***

***किमर्थम् अन्नभण्डारेषु अन्नानि नष्टीभवन्ति, मत्कृते मुष्टिमात्रम् अपि अन्नं नास्ति ।***

***मम वृद्धा माता एतद् ज्ञातुम् अधिकृता अस्ति...***

***किमर्थं तस्यै औषधगुलिकायाः सूच्यौषधस्य पट्टिकायाः व्रणिते सति सीवनस्य च व्यवस्था नास्ति ।***

***भो! मम बालाः एतद् ज्ञातुम् अधिकृताः सन्ति..***

***किमर्थम् अहोरात्रं ते श्रमं कुर्वन्ति किमर्थं तेषाम् अध्ययनार्थं शालायाः व्यवस्था नास्ति।***

*उपर्युक्ते गीते भवते का पङ्क्तिः अरोचत्?*

*भो!मम बभुक्षा एतद् ज्ञातुम् अधिकृता अस्ति" इति पङ्क्तेः कवेः आशयः कः भवितुं शक्नोति?*

*किं भवन्तः स्वभाषया स्वक्षेत्रे प्रचलितं किमपि गीतम् अथवा कामपि कवितां कक्षायां श्रावयितुं शक्नुवन्ति यस्मिन् यस्यां वा मनुष्यस्य समतायाः गरिम्णः वा वर्णनं लभेत।*

## *असमानतायाः विरोधे रचनात्मक-अभिव्यक्तिः*




***केचन जनाः असमानतायाः विरोधे यानि आन्दोलनानि भवन्ति तेषु भागं गृह्णन्ति अपरे च***
***केचन जनाः असमानतायाः विरोधे स्व-लेखन्याः,स्व-ध्वनेः, नृत्यस्य, सङ्गीतस्य, अन्यकलानां च प्रयोगं सर्वकारस्य ध्यानस्य आकर्षणाय, कुर्वन्ति । लेखकाः गायकाः नर्तकाः अन्ये च कलाकाराः अपि असमानतायाः विरोधे अस्माकं विरोधे यः सङ्घर्षः जायते तस्मिन् सक्रियरूपेण स्व-दायित्वं निर्वहन्ति। प्रायः कविताः गीतानि कथाः च न केवलम् अस्मान् प्रेरयन्ति अपितु तानि सर्वाणि अपि समानतायाः विषये अस्माकं विश्वासं दृढीकुर्वन्ति । तानि न अस्मान् प्रेरयन्ति अपितु सम्यग्दिशि चलितुम् अपि अस्मान् शिक्षयन्ति ।***

## भारतस्य संविधानं- कश्चित् जीवन् अभिलेखः

न्यायस्य कृते कस्यचित् आन्दोलनस्य समानतायाः च कृते गीत-माध्यमेन कविता-माध्यमेन च याः समग्राः प्रेरणाः भवन्ति तासु यः कश्चित् भावः अन्तर्निहितः भवति सः मनुष्यस्य समतायाः एव भवति । भवन्तः जानन्ति एव यत् भारतस्य संविधानं सर्वान् अस्मान् समानरूपेण मन्यते । देशे समतायाः कृते जातान्दोलनानि सङ्घर्षाः च प्रायः संविधानस्य आधारेण एव समतायाः न्यायस्य च चर्चां कुर्वन्ति । तवा-मत्स्यसङ्घस्य धीवराणाम् आशायाः आधारः अपि संविधानस्य यानि प्रावधानानि सन्ति तानि एव सन्ति । स्ववार्तायां नैरन्तर्येण ते संविधानस्य एव चर्चां कुर्वन्ति एतस्मात् ते संविधानम् एतादृशस्य जीवद्-अभिलेखस्य रूपेण प्रयोगं कुर्वन्ति यः वास्तविकतायाम् अस्माकं जीवने किञ्चित् अर्थं धारयति अर्थात् सार्थकम् इति वर्तते । लोकतन्त्रे बहवः जनाः समुदायाः च नैरन्तर्येण एतस्यां दिशि



समतायाः मूल्यं लोकतन्त्रस्य केन्द्रे अस्ति। अस्मिन् पुस्तके वयं काञ्चन् विषयान् द्रष्टुं प्रयासं कृतवन्तः ये लोकतन्त्रस्य मूलभावस्य कृते आह्वानम् उत्पादयन्ति। यथा भवद्भिः पठितं देशस्य स्वास्थ्यसेवानां निजकरणं, सञ्चार-माध्यमेषु व्यावसायिक-समूहानां वर्धमानः प्रभावः नियन्त्रणं च, महिलाभिः यः श्रमः क्रियते तस्य न्यूनमूल्यङ्कनं, कार्पासस्य कृषकाणाम् आये वृद्धेः ह्रासः, - एतानि सर्वाणि लोकतन्त्रस्य कृते आह्वानानि सन्ति। एते ते विषयाः सन्ति प्रत्यक्षतः निर्धनान् प्रभावयन्ति तथा च समाजे उपेक्षितसमुदायैः युक्ताः सन्ति। एते देशे समाजिक-आर्थिक-समानताभिः सम्बद्धाः सन्ति।

लोकतन्त्रस्य कृते समता तथा च तस्याः कृते सङ्घर्षः किञ्चित् महत्त्वपूर्णं तत्त्वम् अस्ति। व्यक्तिसमुदाययोः स्वाभिमानः तथा च गरिमा अपि तदैव स्थातुं शक्नोति यदा तेषां पार्श्वे स्वस्य परिवारस्य च सर्वाः आवश्यकताः पूरयितुं पर्याप्तसंसाधनानि स्युः तथा च तैः सह कश्चिद् भेदभावः न स्यात्।

प्रयासं कुर्वन्ति यत् लोकतन्त्रस्य क्षेत्रं वर्धेत अपि च अधिकाद् अधिकेषु विषयेषु समानतायाः आनयनस्य या आवश्यकता वर्तते ताम् आवश्यकतां स्वीकुर्यात्।

**2001** तमे वर्षे लखनवुनगरे **1500** तः अधिकाः जनाः, महिलाः अधिकृत्य याः हिंसा भवति तस्याः विरोधं कर्तुं न्यायगोष्ठ्याम् एकत्रिताः जाताः। तस्यां न्यायगोष्ठ्यां प्रतिष्ठित-महिलानां काचित् निर्णायकमण्डली रचिता तथा च ताभिः न्याधीशानां भूमिकायाः निर्वहणं कुर्वतीभिः, महिला-सम्बन्धि-हिंसायाः पञ्चदशभ्यः अपि अधिक-प्रकरणानां श्रवणं कृतम्। जनाः एतां वास्तविकतां प्रकाशपथम् आनेतुं साहाय्यं कृतवन्तः यत् अधिनियम-प्रक्रियायां गृह्यहिंसायाः विरोधे न्यायस्य याचनाः कुर्वत्यः महिलाः कियन्तम् अल्पम् एव सहयोगं प्राप्नुवन्ति।

*समानतायाः कृते जनानां सङ्घर्षे अस्माकं संविधानस्य कीदृशं दायित्वं भवितुं शक्नोति?*

*किं भवन्तः कस्मिंश्चित् लघुसमूहे समानतायाः कृते किञ्चित् सामाजिकविज्ञापनं सज्जीकर्तुं शक्नुवन्ति।*

## सन्दर्भः


- *द्रीजः ज्यां अपराजितगोयलः च 2003. फ्यूचर-आफ-मिड-डे-मील्स,इकानामिक-एण्ड-पोलिटिकल-वीकली।*
- *हुसैन-रुकैया-सखावतः,1905(पुनर्मुद्रणम्)1988. सुल्तानाज-ड्रीम. फेमिनिस्ट-प्रेस,न्यूयार्कः।*
- *कुमारः,कृष्णः, 1986. ग्रोइंग-अप-मेल,सेमिनार 318 ।*
- **मजुमदारः,इन्द्राणी.2007,वीमेन-एण्ड-ग्लोबलाईजेशन-द-इंपैक्ट-आन-वीमेन-वर्कर्स-इन-द-फार्मल-एण्ड-इनफार्मल-सेक्टर्स-इन-इण्डिया.स्त्री,कोलकाता ।**
- *मीड,मार्गरेट.1928,1973(संस्करणम्). ग्रोइंग-अप-इन-समोआ,अमेरिकन-म्यूजियम-आफ-नैचुरल-हिस्ट्री,वाशिंगटन-डी.सी।*
- *भारतीयायुर्विज्ञान-परिषद्,http://www.mciindia.org/Rules-and-Regutation/Ethis%20Regulation-2002.pdf*
- *पार्क्स*,**रोजा.२०००.क्वाइट-स्ट्रेन्थ-ग्रैण्ड-रैपिड्स,जान्डरवन,मिशिगन ।**
- **रास-सुन्दरी-देवी**,1999,**वर्डस-टू-विन,तनिकासर्वकारस्य अनुवादः तथा च तेषां भूमिकया सार्धं, जुबान,नयी-दिल्ली ।**
- **रायतीर्थंकरः**,1999,**ग्रोथ-एंड-रीसेशन-इन-स्मालस्केल-इण्डस्ट्री-अ-स्टडी-आफ-तमिल-नाडु-पावरमूम्स,इकानामिक-एण्ड-पोलिटिकल-वीकली ।**
- *उच्चतमन्यायालयः(Supreme-court of India), Paschim Banga Khet MaZdoor Samity oF Ors.Vs.State Of West Bangal & Anr.(हाकिम-शेख-केस, निर्णयस्य दिनाङ्कः 6 may 1996,http://judis.nic.in/ Supremecourt/imgs 1.aspx? filename = 15597)*
- *वाल्मीकि,ओमप्रकाश.1997.जूठन,राधाकृष्णप्रकाशनम्, नवदेहली।*
- *विश्वस्थास्थ्यसङ्घटनम् (world Health organization),Essential medicines and health product.org/ rthc/ policybrieffinal.pdf*
- *www.cehet.org/ rthc/ policybrieffnal.pdf*
- *www.infochangeindia.org*
- *जुबान,1996,पोस्टर-वीमेन-अ-विज्युअल-हिस्ट्री-आफ-द-वीमेन्स-मूवमेन्ट-इन-इण्डिया.जुबान,नव -देहली ।*




1. *भारतसर्वकारस्य प्रतिलिप्यधिकारः,2007*
2. *आन्तरिक-विवरणानां सम्यग्दर्शनस्य दायित्वं प्रकाशकस्य अस्ति ।*
3. *समुद्रे भारतस्य जलप्रदेशः उपर्युक्त-आधार-रेखया मापितबाह्यसमुद्रमील इत्यस्य दूरतां यावद् अस्ति।*
4. *चण्डीगढ-पञ्जाब-हरियाणानां च प्रशासिमुख्यालयः चण्डीगढे अस्ति।*
5. *अस्मिन् मानचित्रे अरुणाचलप्रदेश-असम-मेघालयानां मध्ये दर्शितान्तर्राज्यीयाः सीमाः उत्तरीपूर्वीक्षेत्राधिनियमः 1971 इत्यस्य निर्वाचनस्य अनुसारं दर्शिताः सन्ति,परन्तु अधुना सत्यापिताः न सन्ति सत्यापनम् अवशिष्टम् अस्ति।*
6. *भारतस्य बाह्यसीमाः तथा च समुद्रतटीय-रेखाः भारतीय-सर्वेक्षण-विभागद्वारा सत्यापितस्य अभिलेखस्य या प्रधानप्रतिः अस्ति तया तुल्यतां भजन्ते।*
7. *अस्मिन् मानचित्रे उत्तराखण्डस्य झारखण्डस्य बिहारस्य छत्तीसगढस्य मध्यप्रदेशस्य च मध्यभूताः राज्यसीमाः सम्बन्धितसर्वकारैः सत्यापिताः न कृताः सन्ति।*
8. *अस्मिन् मानचित्रे दर्शितनाम्नाम् अक्षरविन्यासः विभिन्नेभ्यः सूत्रेभ्यः प्राप्यते।*

**आन्ध्रप्रदेशराज्यस्य पुनस्सङ्घटनानन्तरं जूनमासस्य द्वितीयदिनाङ्कस्य 2014 तमे वर्षे तेलङ्गाना भारतस्य एकोनत्रिंशत्तमं राज्यं जातम्।*

## *सूचनायाः अधिकारः Right to information (R T I)*

## *सूचनायाः अधिकारः*

*सूचनायाः अधिकार-अधिनियमस्य मूलम् उद्देश्यं नागराणां सशक्तिकरणम् अस्ति , सर्वकारस्य क्रिया-कलापेषु पारदर्शितायाः उत्तरदायित्वस्य च वर्धनं, भ्रष्टाचारस्य वारणं, लोकतन्त्रं जनसेवायै कृतसङ्कल्पं कर्तुं सज्जीकरणम् । भवन्तः सूचनायाः अधिकारस्य उपयोगं कृत्वा सर्वकारस्य विविधानां क्रिया-कलापानां विषये आवश्यकीं सूचनां प्राप्तुं शक्नुवन्ति ।*

### सूचनाधिकार-अधिनियमस्य प्रयोग-विधिः

*आवेदनं सामान्य-पृष्ठे कर्तुं शक्यते । भवन्तः एतत् आवेदनं शुल्क-सहितं सम्बन्धितस्य विभागस्य सूचनाधिकारिणे (PIO) प्रेषयन्तु । एतत् आवेदनं भवन्तः पत्रालयस्य माध्यमेन अपि प्रेषयितुं शक्नुवन्ति ।*

### आवेदन-शुल्कम्

*केन्द्र-सर्वकारस्य विभागैः सम्बन्धित-विषयेषु भवद्भिः १० रूप्यकाणि आवेदन-शुल्क-रूपेण देयानि भविष्यन्ति । तत् शुल्कं प्रस्तुतधन-माध्यमेन धनादेश-माध्यमेन पत्रादेश-माध्यमेन (पोस्टल-ऑर्डर) अथवा वित्तकोशीय-देयादेश-माध्यमेन अपि दातुं शक्यते । राज्यसर्वकारस्य विभागानां कृते एतत् शुल्कं पृथक् अस्ति ।*



आर.टी.आई.सम्बन्धिने अधिकाय ज्ञानाय प्रवेशं कुर्वन्तु www.cic.gov.in,www.rti.gov.in